Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# पत्रकारितायाः स्वरूपं महत्त्वं च

**आचार्यः बृहस्पतिमिश्रः**
प्रोफेसर, संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)
**सुश्री साक्षी**
शोधच्छात्रा, संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)

**शोधसारः** - पत्रकारिता अद्यत्वे विशिष्टं स्थानं भजते इति तु सुविदतमेव । मनुष्यस्य स्वाभाविकी प्रवृत्तिर्भवति यत् तस्य सर्वदैव नूतनतायाः प्रति जिज्ञासा भवति । मानवस्य एषा जिज्ञासा किञ्चित्प्रमाणेन पत्रकारितया अपि शान्ता जायते । अद्यत्वे जनसञ्चारमाध्यमैः झटिति सूचनाः प्राप्तुं शक्यन्ते । एषा सञ्चारप्रणाली आदितः प्रचलिताः अस्ति, परन्तु कालक्रमानुसारं तस्यां परिवर्तनानि जातानि । सः विषयः अस्मिन् प्रबन्धे स्पष्टीकृतो वर्तते । प्राचीनकालिकी पत्रकारिता अद्यतनीयायाः पत्रकारितायाः केन प्रकारेण भिन्ना वर्तते इति विषयस्य प्रतिपादनं सहेतुकम् अभिहितो भवति ।

**साङ्केतिकाः शब्दाः** - पत्रकारिता, आकाशवाणी, जनसञ्चारमाध्यमः, संवाददाता, सङ्गणकः, दूतः ।

---

**प्रस्तावना** - मानवः सामाजिकः प्राणी अस्ति । यथा वयं जानीमः यन्मानवः सर्वदैव नावीन्यं मृगयते तदेव रमणीयं भवति[1]। नूतनानि तथ्यानि, नवीनाश्च घटनाः ज्ञातुं सर्वदैव औत्सुक्यं सन्धारयति । न तु समाजे घटित-घटनानां ज्ञातुं तस्य इच्छा भवति, अपितु देशे-विदेशे प्रचलितानां परिस्थितीनां विषये अपि ज्ञातुं तस्य इच्छा भवति ।[2] पत्रकारिता जनभावनायाः अभिव्यक्तेः, सद्भावानाम् उद्भूतेः नैतिकतायाः च पीठिका अस्ति[3], संस्कृति-सभ्यतायाः, स्वातन्त्रस्य च स्वरत्वेन सह जीवने अभूतपूर्वक्रान्त्याः अग्रेसरा अस्ति । वस्तुतः प्रतिक्षणं परिवर्तनशीलस्य जगतः[4] दर्शनं पत्रकारितया एव संभवमस्ति यत् सर्वेषाम् आकर्षणस्य केन्द्रबिन्दुरस्ति[5]।

मानवः यत् पश्यति तद् अन्यान् जनान् वक्तुम् इच्छति तथा सार्धमेव सर्वेषां वचनं ज्ञातुम् इच्छति । घटनां परीक्षितुम्, अन्येभ्यः कथयितुं, विचार-विमर्श-करणं मानवात्मनः सहजप्रवृत्तिरस्ति[6]। अस्याः अभिव्यक्तेः कारणाद् जनसञ्चारमाध्यमानाम् आविष्कारः अभवत् । अन्येषु शब्देषु वक्तुं शक्यते यद् यथा ज्ञानप्राप्तेः उत्कण्ठया, चिन्तन-अभिव्यक्तेः आकाङ्क्षया भाषायाः प्रयोगाधिक्यं जातं[7] तथैव समाजे परस्परं विचाराणाम् आदान-प्रदानेन पत्रकारितायाः विकासः अभवत् ।

पत्रकारितायाः विषये विद्वांसः स्वविचारान् स्थापितवन्तः-

**श्रीइन्द्रविद्यावाचस्पतिः** कथयति यत् पत्रकारिता पञ्चमः वेदः अस्ति येन वयं ज्ञान-विज्ञानयोः वार्ताः गृहीत्वा स्वपिहितं मस्तिष्कम् उद्घाटयामः ।[8]



**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**डॉ. बद्रीनाथ-कपूरः** लिखति यत् पत्रपत्रिकाभ्यः वार्तानां सङ्कलनं लेखानाम् एकत्र संस्थापनं तेषाञ्च सम्पादनं ततश्च प्रकाशन–व्यवस्था एव पत्रकारिता अभिधीयते ।[9]

**अर्जुन-तिवारी** लिखति पत्रकारिता वैचारिक–चेतनायाः उद्वेलनमस्ति ।[10] कालस्य समाजस्य च सन्दर्भे जागरूकः सन् नागरिकेषु उत्तरदायित्वस्य भावस्य सर्जनमेव पत्रकारिता इति कथ्यते ।[11]

**महादेवी वर्मा** कथयति पत्रकारिता एकं सृजनात्मकं ज्ञानमस्ति । तद्विना समाजस्य परिवर्तनम् असंभवमस्ति । अतः पत्रकारैः स्वकर्त्तव्यम् उत्तरदायित्वञ्च निश्छलतया कर्त्तव्यं यतोहि इतिहासः केवलं तेषां पादोद्धूतैः पिटकैः लिखितः भविष्यति ।[12]

कालस्य समाजस्य च सन्दर्भे जागरूकः सन् नागरिकेषु उत्तरदायित्वस्य भावस्य सर्जनमेव पत्रकारिता इति कथ्यते ।[13] श्रीमद्भगवतगीतायां बहुषु स्थानेषु शुभदृष्टि इत्यस्य प्रयोगः अस्ति । इयं शुभदृष्टिरेव अस्ति, यस्मिन् गुणानां परीक्षणं भवति शुभतत्त्वानां च प्रकाशे उद्घाटनं भवति ।[14] गान्धीजी अस्मिन् समदृष्टेः महत्त्वम् आदधाति । सामाजिकहिते सम्यक् प्रकाशनं पत्रकारिता इति वक्तुं शक्यते । असत्य–अशिव–कुरूपविरोधे सत्यं शिवं सुन्दरम्[15] इत्यस्य शङ्खध्वनिः पत्रकारिता अस्ति ।[16]

**प्राचीनकालिकी पत्रकारिता -** सूचनायाः दानादान–परम्परा प्राचीनतमा दृश्यते यस्याः सङ्केताः वेदादिषु प्राचीनतमेषु ग्रन्थेषु द्रष्टुं शक्यन्ते ।[17] प्राचीनकाले अपि मानवाः परस्परं वार्तालापं, सन्देशप्रेषणं, क्रय–विक्रय–व्यवहरणं, पठन–पाठनादिकं, विचारविनिमयादिकञ्च कुर्वन्ति स्म । येन सिद्ध्यति यत् तत्र सूचना–संचारविषयसम्बद्धो व्यवहारः प्राचीनकाले अपि विकसितः प्रचलितश्चासीत् परं तात्कालिकी तस्य रूपं, प्रणाली प्रक्रिया च भिन्नैव समवर्तत।

प्राचीनकाले वार्तायाः[18] प्रसारणं परस्परं श्रुत्वा भवति स्म ।[19] सम्राट् प्रमुखानां माध्यमेन, दूतानां माध्यमेन च वृत्तपत्राणि प्रसारयति स्म तथा तेषां दूताः[20] सार्वजनिकस्थानेषु तेषाम् उद्घोषणाः उच्चैः स्वरैः उच्चार्य नगरेषु प्रसारयन्ति स्म । हिन्दुधर्मशास्त्रे एकस्यैव जनस्य स्वर्गलोके पृथ्वीलोके च वार्ताप्रसारणस्य वर्णनं प्राप्यते ।[21] सः एकः मानवः नारदऋषिरासीत्, यम् आधुनिके अर्थे संवाददाता इति वक्तुं शक्यते ।[22] महर्षिनारदमुनिः पत्रकाराणां प्रेरणास्रोतः, प्राचीनकालस्य प्रथमपत्रकाररूपेण कथितुं शक्यते । सूचनायाः प्रथमतया प्रसारः महर्षिः अकरोत्, नारदमुनिः पत्रकारितायाः पितामहः । पुराणेषु नारदमुनिः भागवतस्य संवाददातारूपेण प्रस्तुतः । नारदमुनेः रचिते भक्तिसूत्रे प्रत्यक्षरूपेण प्रतीयते यत् सूत्रेषु भक्तिमार्गस्य दर्शनं दत्तं परञ्च सूक्ष्मतया यदावलोकयामः तदा दृश्यते पत्रकारितायाः शाश्वतसिद्धान्तानां परिपालनम् अस्ति ।[23]

प्राचीनसमये सञ्चारव्यवस्था कीदृशी आसीत्, सङ्केतरूपेण कानिचित् प्रमाणानि द्रष्टव्यानि । तथा–

**अग्निर्वै देवानां होता ।[24] इन्द्रस्य दूतीरिषिता चरामि ।[25]**

कोशेषु दूतस्य अर्थः सन्देशहरः भवति –

**स्यात् सन्देशहरो दूतः दूत्यं तद् भावकर्मणि ।[26] यथोक्तवादी सन्देशहरो लेखहारकः।[27]**

मनुस्मृतौ दूतस्य लक्षणानि स्पष्टयन् महर्षिमनुः लिखति – सः विद्वान्, इङ्गिताकारचेष्टादीनां ज्ञाता, शुद्धचित्तः, चतुरः, शासनानुरक्तः, देश–कालादीनां विज्ञाता, सुरूपः, निर्भीकः वाग्मी च भवेत्।[28] अग्निपुराणकारः दूतस्य संक्षेपेण लक्षणं ददाति – यः प्रियभाषी, अक्षीणः अत्यन्तबल–सम्पन्नः भवेत्[29]। गरुडपुराणे में दूतस्य लक्षण भवति – बुद्धिमान्,

मतिमान्, परचित्ताभिप्रायस्य विज्ञाता, क्रूरः आज्ञापालकः भवेत्[30]। महाभारते दूतस्य योग्यतानाम् उल्लेखः प्राप्यते[31]। राजनीति-निपुणः चाणक्यः दूतस्य लक्षणम् इत्थं करोति –

मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः।

धीरो यथोक्तवादी च एष दूतो विधीयते॥[32]

कौटिल्यः अर्थशास्त्रे दूतानां त्रिधा विभाजनम् अस्ति – निसृष्टार्थः[33], परिमितार्थः[34], शासनहारः[35]

आचार्यविश्वनाथः साहित्यदर्पणे एतेषां त्रयाणां दूतानां[36] त्रिविधभेदं स्पष्टयति। साहित्यिकदूतानां अधिकांशलक्षणानि राजनीतिकदूतानां लक्षणैः सह एव साम्यं भजन्ते। – निसृष्टार्थदूतः –यः द्वयोः मनोभावम् अवगत्य प्रश्नानां समाधानं कृत्वा प्रत्येकं कार्यं स्वयं सुसम्पादयति[37]। मितार्थदूतः अथवा परिमितार्थदूतः – यः वार्तालापं न्यूनं करोति किन्तु यदर्थं प्रेषितः तद् सम्पादयेद् एव[38]। सन्देशहारकदूतः अथवा शासनहारः – यः तावदेव वदेद् यावद् सूचितम् अस्ति[39]।

रामायणे दौत्यकर्माणि प्रतिपादितानि सन्ति तान्यपि चास्याः एव प्रणाल्याः अङ्गभूतानि उदाहरणानि एव सन्ति । हनुमता लङ्कायां सीतया सार्धं मिलित्वा यो वार्तालापो विहितः, श्रीरामस्य सन्देशः श्रावितः तस्याश्च गृहीतः इत्यादिकं सर्वमपि दूत-कर्म एव –

**अहं रामस्य सन्देशाद्देवि दूतस्तवागतः ।**

**वैदेहि कुशलीरामः स त्वां कौशलमब्रवीत् ।**[40]

रामचरितमानसे गोस्वामिना तुलसीदासेन वर्णितं यद् दशरथ-मृत्योरनन्तरं वृत्तमेतत् कुमाराय भरताय ज्ञापयितुं दूताः प्रेषिताः –

**दूत बोलाइ बहुरि असभाषा,धावहु वेगि भरत पहिं जाहू**

**नृप सुधि कतहुं कहु जनि काहू ।**

**सुनि मुनि आय सुधावन धाए, चले बेग बर बाजि लजाए ।।**[41]

संवादसंप्रेषणं सक्षमपत्रकारितायाः मूलतत्त्वम् । संवादसंप्रेषणे ध्यातव्यतत्त्वानां विषये महाभारते बहूत्तमं वर्णितम् – तादृशं वाक्यं यत् सार्थकं भवेत्। । अर्थान्तरं न भवेत्। आवश्यकाद् अधिकं, कठोरं संदिग्धं च वचनं न भवेत्[42]। अक्षराणां संयोगः न भवेत्। गुरुक्रूरयोः अक्षरयोः संयोगः न भवेत् मृदुशब्दाः च भवेयुः। न मृषा न च धर्मार्थकामविरोधी भवेत्[43]। कष्टप्रदानि शब्दानि न भवेयुः। निम्नपदत्व-नामदोषो, यादृच्छिकोच्चारणं, निष्प्रयोजनं अयुक्तं च न भवेत्[44]। वक्तुश्रोत्रयोः अनुकूलं वचनं वदेत्। काम-क्रोध-भय-लोभ-दैन्य-अधर्मकारणात् तथा च लज्जा-करुणा-अभिमानात् किमपि न वक्तव्यम्[45]।

संप्रेषकः श्रोत्रे यत् किमपि वदति तत् सन्देशः। सन्देशस्य विषयवस्तुनः च भेदः अस्ति । सन्देशः विषयवस्तुनः अनुरूपं न भवति अपितु सन्देशः सः भवति यस्य सन्दर्भे विषयवस्तु किमपि वदति । सत्सन्देशे सामान्यतया एतानि लक्षणानि भवितुमर्हन्ति । सन्देशः उद्देश्यपूर्णः, सत्यः, सन्तुलितः, व्यावहारिकः, वैज्ञानिकाधारितः, लक्षितव्यक्तिसमूहस्य कृते समुचितः, आवश्यकतानुसारं च समये एव भवेत् अर्थाद् अष्टादश गुणपूर्णः तार्किकार्थयुक्तः नव दोषविहीनः शब्दसमूहरूपि वाक्यम् एव सन्देशः भवति[46]।

तस्मिन् वाक्ये सौक्ष्म्यम्, सांख्यम्, क्रमः, निर्णयः, प्रयोजनम् इति पञ्चविधाः अर्थाः भवेयुः[47]। सौक्ष्यादीनाम् एतेषां पद-पदार्थ-वाक्य-वाक्यार्थरूपेण व्याख्यानम् अपेक्षितम्[48]।

यत्र बहुविधाः ज्ञेयार्थाः सन्ति तथा च 'इदं घटं, एतत् पटम्' इत्यादिषु विषयेषु पृथक् ज्ञानं भवति, तत्र तादृशेषु स्थानेषु सम्यक् निर्णयं कुर्वत्याः बुद्ध्याः तत् सौक्ष्म्यम् उच्यते[49]।

विशिष्टम् उद्देश्यं विचिन्त्य दोषस्य गुणस्य च प्रमाणानां विभागकरणं संख्या इति कथ्यते[50]।

परिगणितेषु गुणदोषेषु प्रथमं कश्चिद् गुणो वा दोषो वा वक्तव्यः, पश्चात् अन्यस्य उल्लेखः करणीयः इति पूर्वानन्तरयोः वाक्यस्य तादृशः क्रमः वाक्यविशेषज्ञैः क्रम इति उच्यते[51]।

यदा धर्मस्य, अर्थस्य, कामस्य, मोक्षस्य च विषयेषु विचिन्तनं कृत्वा वाक्यस्य अन्ते इदम् इत्थम् इति एषः विनिर्णयः इति प्रोच्यते[52]।

यदा समाजे इच्छायाः अपूर्णत्वाद् द्वेषभावाद् वा बहूनि दुःखानि उत्पद्यन्ते तदा स्वामिनः उद्देश्यानुसारं यत् प्रवर्तनं तत् प्रयोजनम् इति कथ्यते[53]।

संवाददाता यदा सर्वैः सह प्रथमं दृष्ट्वा वार्तालापं करोति, सर्वैः सह स्मितेन च वदति, तस्मात् सर्वे प्रसन्नाः भवन्ति[54]। यदा अखण्डभावेन वक्तरि श्रोतरि वाक्ये च अविकलभावेन साम्यावस्था भवति तेन वक्त्रा प्रसारितः सन्देशः श्रोत्रा ज्ञायते[55]। यदा वक्ता वदन् श्रोतुः उपेक्षाम् कृत्वा वक्तुं आरभते तदा सः विषयः श्रोतुः हृदयं न प्रविशति[56]।

रामचरितमानसे प्रथमवारं **समाचार** शब्दस्य प्रयोगः तदा जातः, यदा सती स्वकीय-पितुः यज्ञे स्वात्मानं जुहोति -

**समाचार सब शङ्कर पाए, वीरभद्र करिकोप उठाये ।**

**जग्य विध्वंस जाये तिन्ह कीन्हा, सकल सुरूह विधिवत दण्ड दीन्हा ।।**[57]

तुलसीदासः अस्याः घटनायाः वर्णनं समाचार-रूपेण करोति-

**नारद समाचार सब पाये, कौतुकही गिरि गेह सिधाये ।**[58]

महाभारते सञ्जयस्य दिव्यदृष्टेर्वर्णनमपि प्रणालीमिमां एव सङ्केतयति । यदा धृतराष्ट्रः युद्धक्षेत्रविषये सञ्जयं पृच्छति[59] तदा असौ सञ्जयः कथं सर्वमपि युद्धगतं वृत्तान्तं पश्यति दिव्यचक्षुषा, श्रृणोति दिव्यकर्णाभ्यां, श्रावयति च[60] तत् सर्वं धृतराष्ट्रादिकमिति एतद् निखिलं वृत्तजालम् अस्याः प्रणाल्याः पुरा रूपमेव सङ्केतयति । इत्यादीनि सर्वाण्यप्युदाहरणानि खल्विममेवाशयं तथ्यञ्च प्रकटयन्ति यत् प्राचीनकाले अपि सूचना-सञ्चारप्रणाली विविधेषु क्षेत्रेषु प्रचलिता आसीत् । तथैव राष्ट्राणां राज्यानां समाजस्य संस्थानां वा विविधा क्रिया अनया रीत्या सम्पन्ना अभूत् ।

**अद्यतनीया पत्रकारिता –** आधुनिक-पत्रकारिता सूचनाप्रदानस्य एतादृशी व्यवस्थारूपेण विकसिता अस्ति, यस्याः क्षेत्रस्य व्यापकता अनुमातुं न शक्यते । वैद्युदाण्विकसञ्चार-क्रान्त्या ज्ञानविज्ञानकलासाहित्यसंस्कृतिसंघर्षक्रान्त्युत्थानपतनादीनां विविधभावानां मनोहरं यथार्थञ्च युगानुरूपं चित्रं प्रतिबिम्बं च पत्रकारितादर्पणे द्रष्टुं शक्यते । मानवः सूचनायाः विषये अतीव जागरूकः जातः । मानवजीवनस्य व्यापकं क्षेत्रं पत्रकारितायां समाविष्टं समवलोक्यते । कालक्रमानुसारं सञ्जायमानैः विविधैः वैज्ञानिकाविष्कारैः पत्रकारितायाः स्वरूप-परिवर्तनं जातम् ।[61] साम्प्रतं न केवलं पत्रपत्रिकाणां मुद्रणमेव पत्रपत्रकारितायाः क्षेत्रे परिगण्यते अपितु दृश्यश्रव्यपत्रकारिता वैद्युदाणविकपत्रकारितापि अस्याः क्षेत्रे आगच्छति ।

अद्यत्वे पत्रकारितायाः कृते आङ्लभाषायां **जर्नलिज्म** शब्दः[62] प्रयुज्यते यः जर्नल इति शब्दाद् निष्पन्नः यस्य शाब्दिकः अर्थः अस्ति **दैनिकमिति ।** दैनन्दिनक्रियाकलापानां सर्वकारीयसभानां विवरणं जर्नल-मध्ये भवति ।[63] सप्तदश-अष्टादशशताब्दयोः मध्ये **पीरियाडिकल** इति शब्दस्य स्थाने लैटिनभाषायाः शब्दः **डियूरनल** तथा **जर्नल** इत्येतयोः शब्दयोः प्रयोगः अभवत् । विंशे शताब्दे गम्भीरसमालोचना विद्वत्तापूर्णप्रकाशनम् च अस्मिन्नैव परिगण्यते स्म । जर्नल इति

शब्दाद् निष्पन्नः जर्नलिज्म शब्दः अपेक्षाकृद् व्यापकः शब्दः अस्ति । समाचारपत्राणां तथा विविधकालिकपत्रिकाणां सम्पादनं लेखनञ्च तत्सम्बन्धानि कार्याणि पत्रकारितायाम् एव अन्तर्भवन्ति । इत्थं वार्तानां सङ्कलनं, प्रसारणं, विज्ञापनकला, पत्रकारिता भवति । समकालीनक्रियाकलापानां सञ्चारसम्बद्धानि सर्वाणि साधनानि अस्यां पत्रकारितायां समाविष्टाः सन्ति ।[64]

चैम्बर तथा न्यू वेब्स्टर्स शब्दकोशानुसारं प्रकाशनं, सम्पादनं, लेखनं तथा प्रसारणयुक्तसमाचारमाध्यमानां व्यवसायः एव पत्रकारिता अस्ति ।[65]

सम्प्रति सर्वत्र सङ्गणकस्य वर्चस्वम् अस्ति । उद्योग-शिक्षा-यातायात-निर्वाचन-जलवायुसम्बन्धिसूचनाः वैधानिकव्यवस्थां च अधिकं कुशलतया कर्तुं सङ्गणकः सर्वाधिकः समर्थः अस्ति ।[66] दूरसञ्चारव्यवस्थाम् अधिकाधिकं सफलं कर्तुं वैद्युतिकी(इलेक्ट्रॉनिक)-प्रगत्या सह सम्बद्धस्य सङ्गणकस्य विशेषयोगदानमस्ति । कपोत-डाक-तार-दूरभाषस्य युगः समाप्तः । पत्रकारितायाः आधारः कागदपत्रस्य स्थाने सङ्गणकेन क्रियते । अन्तर्जालः, साइबर-मल्टीमीडिया-अभिसरण(कनवर्जेंस)-इत्यादिभिः पत्रकारितायाः स्वरूपं परिवर्तितम् । अस्य मूलकारणं सङ्गणकः एव अस्ति । प्रकाशनस्य, चित्रणस्य, सञ्चारस्य, विश्लेषणस्य च क्रियाकलापानां सम्पादने सङ्गणकस्य महती भूमिका अस्ति । वैद्युतिकी-प्रौद्योगिक्याः कारणाद् मुद्रितसञ्चारः तथा वैद्युतिकसञ्चाराः (इलेक्ट्रॉनिकमीडिया) परस्परं विलीनाः जाताः । अन्तर्जालमाध्यमेन वृत्तपत्राणि अपवहनं कृत्वा पठनम् अस्याः वर्तमानसुविधायाः कारणात् पत्रकारिता अतीव गतिशीलतां प्राप्तवती । अद्यतनः लेखकः सम्पादकश्च फैक्स, मोडेम, सेलुलर, उपग्रहसम्बद्धैः संसाधनैः सुसज्जितः अस्ति । स सङ्केतमात्रेण एव इष्टवार्तां प्राप्नोति तत्क्षणमेव सम्पादयति, शीर्षकं ददाति, पृष्ठनिर्माणानन्तरं मुद्रणार्थं प्रेषयति ।

सूचनायाः प्रसारकाः दूरभाष-टेलीग्राफ-टेलेक्स एते अधुना अप्रचलिताः जाताः ।[67] अणुसङ्केतः, ई-फैक्स, सेल्यूलर फोन पेजर, टेलीटेक्स्ट तथा सङ्गणकदत्तांशकोशाः वर्धमानाः सन्ति । विदेशसंचारनिगम-सीमित (लिमिटेड), राष्ट्रीयसूचना-विज्ञान-केन्द्रम्, दूरसञ्चार-विकास-प्रौद्योगिकी-केन्द्रम् इत्यादिभिः सूचनाप्रवाहः अत्यन्तद्रुतगत्या प्रचलति ।[68] कतिपयदिनानि पूर्वं यावद् द्विचक्रिकायां स्वचलितद्विचक्रिकायां वा धावन्तः बहवः संवाददातारः दृश्यन्ते स्म । परन्तु सम्प्रति एतादृशी व्यवस्था नास्ति केचन एव संवाददातारः द्विचक्रिकायां धावन्तः दृश्यन्ते । अद्यत्वे सञ्चारस्य, मुद्रणस्य, सम्पादनस्य, च द्रुतसाधनानि अप्रत्याशितरोमाञ्चकारीयात्रां पूरितवन्तः । पत्रकारः लेखनीं मसिं च त्यक्तवान् । सः पत्रकारः दूरभाषेण, अन्तर्जालेन, अणुसङ्केतेन, फैक्स, लेपटॉप, इत्यादिभिः स्वविचारान् सञ्चारयति । **डिजिटल** (आधुनिक संचालित बुद्धिकुञ्ज) इति नूतना प्रौद्योगिकी अस्ति येन माध्यमेन यन्त्रस्य मानवस्य च मध्ये सञ्चारः स्थापयितुं शक्यते । बाइट[69] इदानीं सूचनासञ्चारस्य महत्त्वपूर्णं घटकम् अस्ति ।[70] सारांशेन वक्तुं शक्यते शक्यते यद् नूतनया सूचनाप्रौद्योगिक्या पत्रकारितायाम् आशिखनखपरिवर्तनं जातम् ।

**उपसंहारः** - गम्भीरविचारधारायाः परिणामस्य नाम पत्रकारिता अस्ति या समाजस्य अद्वितीयं तत्त्वम् अस्ति । समाजस्य उत्सुकता यथा यथा तीव्रा भवति तथा तथा पत्रकारितायाः विकासः शीघ्रं भवति । उत्सुक-मस्तिष्काय नूतनानि विविधानि च तथ्यानि तथा विश्वस्य विभिन्नपरिस्थितीनां विषये ज्ञानं पत्रकारिता एव प्रदातुं शक्नोति । अद्यत्वे पत्रकारितायाः मुख्यमुद्देश्यमेव इदमस्ति सम्पूर्णसमाजस्य घटितघटनानां समग्रस्वरूपं सर्वेषां समक्षे स्थापनीयम् । समाजस्य सर्वेषां जनानां कृते दूरस्थविषयणां प्रकटीकरणं पत्रकारितायाः सफलतायाः मूलतत्त्वमस्ति । समाजे जागरूकतायाः वातावरणं निर्माणे पत्रकारिता सहायिका भवति ।

इत्थं प्राचीनकाले सूचना-प्रेषणाय यथा दूतानां, पत्राणां, शिलालेखानाम् इत्यादीनां प्रयोगः भवति स्म तथा तस्मिन् कालः अपि अधिकः अपेक्षते स्म, परन्तु अद्यत्वे तत्क्षणमेव वयं सर्वं ज्ञातुं शक्नुमः । अद्य सञ्चारमाध्यमाः (मीडिया) महत्त्वपूर्णस्तम्भत्वेन स्थापिताः सन्ति । बालेन्दुशर्मा दधीचः, माइक्रोसॉफ्ट-निदेशकः डेटा रिपोर्टल इत्यस्य **डिजिटल 2023** इति प्रतिवेदनानुसारं कथयति यद् भारतस्य जनसङ्ख्यायाः प्रायः अर्धभागः(प्रायः 70 कोटिजनाः) अन्तरजालसङ्गणकेन सह सम्बद्धाः सन्ति तथा एतेषु 66 प्रतिशत नागरिकाः सामाजिकमाध्यमेषु (सोशल मीडिया) उपस्थिताः सन्ति ।[71] दशकत्रयपूर्वम् अनुमानमपि नासीद् यद् अस्माकं जीवने एतादृशं माध्यमम् आगमिष्यति, यद् एतावतैः जनैः सम्बद्धं भविष्यति, अस्माभिः सह नक्तंदिवं भविष्यति, येन सूचनाप्रापणे एतावता सुविधा भविष्यति ।

परिशीलितसन्दर्भग्रन्थ-सूची


1. ऋग्वेदसंहिता , परोपकारिणी सभा,अजमेर,1987 ई0
2. मनुस्मृतिः(मनु विरचित), (स.)श्रीगोपालशास्त्री नेने, 2039वि,
   चौखम्बा संस्कृत संस्थान,गोपाल मन्दिर लेन, वाराणसी , उ. प्र.,भारत
3. रामायण, आदिकवि वाल्मिकी, गीता प्रेस, गोरखपुर
4. महाभारतम्, ,गीताप्रेस, गोरखपुर, उ. प्र.,भारत
5. श्रीमद्भगवद्गीता, गीता प्रेस, गोरखपुर
6. अग्निपुराण, गीता प्रेस, गोरखपुर, 2016
7. गरुणपुराण, चौखम्बा कृष्णदास अकादमी, वाराणसी-221002
8. कौटिलीयम् अर्थशास्त्रम्, चौखम्बा कृष्णदास अकादमी, वाराणसी-221002
9. अमरकोश, अमरसिंह, भारतीय विद्या संस्थान, वाराणसी-221002
10. शब्दकल्पद्रुम, राजा राधाकान्त देव, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली
11. संस्कृत-हिन्दी-कोष- श्रीवामनशिवराम-आप्टे,
    मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि. दिल्ली, सन् 1989
12. वेणीसंहार, महाकवि भट्टनारायण, चौखम्बा सुरभारती प्रकाशन, वाराणसी
13. काव्यादर्शः, महाकविदण्डी, भारतीय विद्या भवन, वाराणसी 1989 ई
14. साहित्यदर्पणः, मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि. दिल्ली, 2016 ई
15. शिशुपालवधम्, महाकवि-माघः, चौखम्बा सुरभारती प्रकाशन, वाराणसी
16. हितोपदेश, प.रामेश्वर भट्ट, चौखम्बा संस्कृत संस्थान, दिल्ली
17. संस्कृत पत्रकारिता, डॉ. बलदेवानन्द सागर, संस्कृत भारती, नई दिल्ली
18. रामचरितमानस, तुलसीदास, गीता प्रेस, गोरखपुर
19. आधुनिक पत्रकारिता, अर्जुन तिवारी, विश्वविद्यालय प्रकाशन, वाराणसी
20. सम्पूर्ण पत्रकारिता, अर्जुन तिवारी, विश्वविद्यालय प्रकाशन, वाराणसी
21. भाषाविज्ञान, डॉ. कर्णसिंह, साहित्य भण्डार, सुभाष बाजार, मेरठ
22. भारतीय भाषविज्ञान, आचार्य किशोरी दास वाजपेयी,

वाणी प्रकाशन ग्रुप, 4695, 21 ए दरियागंज, नई दिल्ली
23. वैज्ञानिक परिभाषा कोश, कपूर बद्रीनाथ, शब्दलोक प्रकाशन, 1965
24. विविध संचार माध्यम और पत्रकारिता, डॉ. राहुल दुबे, मनीष प्रकाशन, वाराणसी, 2016
25. पॉलिटिक्स, अरस्तू, जॉर्ज रूटलेज एण्ड सन्स लिमिटिड, मैन्चेस्टर एण्ड न्यूयॉर्क, 1895
26. पाञ्चजन्य, हिन्दी साप्ताहिक समाचार पत्र, भारत प्रकाश लिमिटेड, दिल्ली
27. https://hi.quora.com/
28. https://www.bing.com/search?q=byte+wikipedia+in+hindi+language
29. https://hi.wikipedia.org/wiki/
30. https://brainly.in/

1 क्षणे-क्षणे यत् नवतामुपैति तदेव रूपं रमणीयतायाः । शिशुपालवधम् - 4.17

2 क. हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ।। महाभारतम्, स्वर्गारोहणपर्व, अ- 5.61
ख. उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।
मरणव्याधिशोकानां किमद्य निपतिष्यति।। हितोपदेशः, आमुखम्

3 आधुनिक पत्रकारिता, पृष्ठ सं.-1

4 संसार में हर वस्तु अस्थाई है जो धीरे-धीरे नष्ट हो जाती है ।
यही सृष्टि का सत्य नियम है जो सनातन परिवर्तन दर्शाता है ।। (शेखर खराड़ी)

5 सम्पूर्ण पत्रकारिता, पृष्ठ सं.-2

6 भाषा-विज्ञान, भोलानाथ तिवारी, पृष्ठ सं.

7 क.भारतीय भाषा-विज्ञान
ख. वाचामेव प्रसादेन लोकयात्रा प्रवर्तते । काव्यादर्शः, 1-3

8 आधुनिक पत्रकारिता, पृष्ठ सं.-1

9 विविध संचार माध्यम और पत्रकारिता, पृष्ठ सं.-14

10 आधुनिक पत्रकारिता, पृष्ठ सं.-11

11 आधुनिक पत्रकारिता, पृष्ठ सं.-10

12 विविध संचार माध्यम और पत्रकारिता, पृष्ठ सं.-12

13 आधुनिक पत्रकारिता, पृष्ठ सं.-10

14 सम्पूर्ण पत्रकारिता, पृष्ठ सं.-25

15 प्रसिद्ध अंगरेज आलोचक आइ ए रिचर्ड ने अपनी कृति principles of literary criticism इसे किसी भी रचना के मूल्यांकन की कसौटी मानते हुए कहा कि उसे truth, good and beautiful होना चाहिए । इसके बाद रविन्द्र नाथ के पिता महर्षि देवेन्द्र नाथ ठाकुर ने इसका अनुवाद किया –सत्यम् शिवम् सुन्दरम् जो वेदवाक्य की तरह लोकप्रिय हुआ । (https;/hi.quora.com)

16 आधुनिक पत्रकारिता, पृष्ठ सं.-10

17 भरतकुलहितकाम्यया स्वयं प्रतिपन्नदौत्यस्य देवकीसूनोश्चक्रपाणेर्महाराजदुर्योधनशिविरं

प्रति प्रस्थातुकामस्य इति । वेणीसंहार, प्रथमः अङ्कः

18 वार्ता अर्थात् वृत्तः वृत्तान्तो वा । शब्दकल्पद्रुमे अमरकोशे च वृत्तान्तः, संवादः, वार्ता, प्रवृत्तिः, उदन्तः, वृत्तः, श्रुतिः इत्यादयः पर्यायवाचिनः शब्दाः प्राप्यन्ते । प्रसन्नराघवे यथा वार्ता शब्दः-

वार्ता च कौतुकमयी विमला च विद्या, लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवारम्, एतत्त्रयं प्रसरति स्वयमेव भूमौ ।। संस्कृत-पत्रकारिता, पृष्ठ सं.-4

19 विविध संचार माध्यम और पत्रकारिता, डॉ. राहुल कृष्ण, पृष्ठ सं.-26

20 कुलीनः कुलसम्पन्नो वाग्मी दक्षः प्रियवदः ।
यथोवक्तवादी स्मृतिवान् दूतः स्यात्सप्तभिर्गुणैः । ।

21 अहो देवर्षिर्धन्योयं यत्कीर्तिं शाङ्‍र्गधन्वनः ।
गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत् ।। श्रींमद्भगवतद्गीता,1-6-39

22 विविध संचार माध्यम और पत्रकारिता, पृष्ठ सं.-26

23 भवतु निश्चयदाढ्यार्दूर्ध्वं शास्त्ररक्षणम् , भ. क. सू 12

24 अग्नि-सूक्त, ऋग्वेद 1-1-1

25 ऋग्वेद 10-108-2

26 अमरकोशः, 2-8-16

27 शब्दकल्पद्रुमः, पृष्ठ सं. 228

28 दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्वेशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते॥ मनुस्मृतिः - 7.63-64

29 दूतश्च प्रियवादी स्यादक्षीणोऽतिबलान्वितः॥ अग्निपुराणम् -85.2

30 बुद्धिमान्मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च एष दूतो विधीयते॥ गरुडपुराणम् - 68.8

31 कुलीनः कुलसम्पन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी स्मृतिमान् दूतः स्यात्सप्तभिर्गुणैः॥ महाभारतम्, शान्तिपर्व -85.28

32 चाणक्यनीतिः - 235

33 संपादोपेतो निसृष्टार्थः, अर्थशास्त्रम् - 1.16.2

34 पादगुणहीनः परिमितार्थः, अर्थशास्त्रम्1.16.3

35 अर्धगुणहीनः शासनहारः, अर्थशास्त्रम् - 1.16.4

36 निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः॥ साहित्यदर्पणः - 3.47

37 उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्य निसृष्टार्थस्तु स स्मृतः॥ साहित्यदर्पणः - 3.48

38 मितार्थभाषी कार्यस्य सिद्धकारः मितार्थकः । साहित्यदर्पणः - 3.49

39 यावद्भाषितसन्देशहारः सन्देशहारकः॥ साहित्यदर्पणः - 3.49

40 वाल्मीकिरामायणम्, सुन्दरकाण्डम्, सर्ग–34–2

41 रामचरितमानसम्, अयोध्याकाण्डम् –156–1,2

42 उपेतार्थमभिन्नार्थं न्यायवृत्तं न चाधिकम् ।
नाश्लक्ष्णं न च संदिग्धं वक्ष्यामि परमं ततः ।। म.भा., शान्तिपर्व –308.87

43 न गुर्वक्षरसंयुक्तं पराङ्गमुखसुखं न च ।
नानृतं न त्रिवर्गेण विरुद्धं नाप्यसंस्कृतम् ।। म.भा., शान्तिपर्व –308.88

44 न न्यूनं कष्टशब्दं वा विक्रमाभिहितं न च ।
न शेषमनु कल्पेन निष्कारणमहेतुकम् ।। म.भा., शान्तिपर्व –308.89

45 कामात् क्रोधाद् भयाल्लोभाद् दैन्याच्चानार्यकात् तथा ।
ह्रीतोनुक्रोशतो मानान्न वाक्ष्यामि कथञ्चन ।। म.भा., शान्तिपर्व –308.90

46 नवभिर्नवभिश्चैव दोषैर्वाग्बुद्धिदूषणैः ।
अपेतमुपपन्नार्थमष्टादशगुणान्वितम् ।। म.भा., शान्तिपर्व –308.78

47 सौक्ष्म्यं सांख्यक्रमौ चोभौ निर्णयः सप्रयोजनः ।
पञ्चैतान्यर्थजातानि वाक्यमित्युच्यते नृप ।। म.भा., शान्तिपर्व –308.79

48 एषामेकैकशोऽर्थानां सौक्ष्म्यादीनां सुलक्षणम् ।
श्रृणु संसार्यमाणानां पदार्थैः पदवाक्यतः ।। म.भा., शान्तिपर्व –308.80

49 ज्ञानं ज्ञेयेषु भिन्नेषु यदा भेदेन वर्तते ।
तत्रातिशायिनी बुद्धिस्तत् सौक्ष्म्यमिति वर्तते ।। म.भा., शान्तिपर्व–308.81

50 दोषाणां च गुणानां च प्रमाणं प्रविभागशः ।
कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्॥ म.भा., शान्तिपर्व–308.82

51 इदं पूर्वमिदं पश्चाद् वक्तव्यं यद् विवक्षितम् ।
क्रमयोगं तमप्याहुर्वाक्यं वाक्यविदो जनाः ।। म.भा., शान्तिपर्व–308.83

52 धर्मार्थकाममोक्षेषु प्रतिज्ञाय विशेषतः ।
इदं तदिति वाक्यान्ते प्रोच्यते स विनिर्णयः॥ म.भा., शान्तिपर्व–308.84

53 इच्छा–द्वेष–भवैः दुःखैः प्रकर्षो यत्र जायते ।
तत्र या नृपते वृत्तिः तत् प्रयोजनम् इष्यते॥ म.भा., शान्तिपर्व–308.85

54 यस्तु पूर्वमभिप्रेक्ष्य पूर्वमेवाभिभाषते ।
स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ।। म.भा., शान्तिपर्व – 85.6

55 वक्ता श्रोता च वाक्यं च यदा त्वविकलं नृप ।
सममेति विवक्षायां तदा सोऽर्थः प्रकाशते ।। म.भा., शान्तिपर्व –308.91

56 वक्तव्ये तु यदा वक्ता श्रोतारमवमन्यते ।
स्वार्थमाह परार्थं वा तदा वाक्यं न रोहति ।। म.भा., शान्तिपर्व –308.92

57 रामचरितमानसम्, बालकाण्डम् – 64–1,2

58 रामचरितमानसम्, बालकाण्डम् – 65–5

59 धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जयः ।। श्रीमद्भागवद्गीता, 1-1

60 दृष्ट्वा तु पाण्डवानिकं व्यूढं दुर्योधनस्तदा ।

आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ।। श्रीमद्भागवद्गीता, 1-2

61 आधुनिक पत्रकारिता, पृष्ठ सं.-21

62 हिन्दी- अङ्ग्रेजी शब्दकोशः, पृष्ठ सं. 380

63 आधुनिक पत्रकारिता, पृष्ठ सं.-10

64 Joujnal, a word which came into English from late Latin DIURNALIS, through French journal with the original meaning of daily.... Later and current meanings are derived from the idea of daily entries; journal as official record of meeting..... Diurnal and journal were both used for perodical in the 17th and 18th centuries. In the 20th century journal is more frequently applied to reviews and learned publications.

Journalism includes the writing and editing of newspapers and periodicals, Although this is the basic definition of various tasks and processes intimately conncected with the production of serial publications are commonly classified as journalistic.(*ENCYCLOPAEDIA BRITANNICA*), आधुनिक पत्रकारिता, पृष्ठ सं.-11

65 Journalism; The occupation of conducting a news medium, including publishing, editing, writing or broadcasting. *NEW WEBSTER'S DICTIONARY,*

Journalism: The profession of conducting or writing for public journals. - *CHAMBERS DICTIONARY,* आधुनिक पत्रकारिता, पृष्ठ सं.-11

66 आधुनिक पत्रकारिता, पृष्ठ सं.-20

67 आधुनिक पत्रकारिता, पृष्ठ सं.-250

68 आधुनिक पत्रकारिता, पृष्ठ सं.-250

69 क. भाषणात् पत्रकारसम्मेलनात् वा गृहीतः लघुः श्रव्यखण्डः अथवा दृश्यखण्डः यः सामान्यतया वार्ताप्रसारणसमये प्रसारितः भवति । (https://brainly.in/question/1194271)

ख. बाइट संगणन व दूरसंचार में सूचना की इकाई होता है । यह 8 बिट से मिलकर बना होता है । बाइट कंप्यूटर की स्मृति में एक अक्षर द्वारा ली जाने वाली जगह को कहते है । ये कंप्यूटर स्मृति की दूसरी सबसे छोटी इकाई होती है । 1 बाइट में 8 बिट के बराबर जगह होती है । 1 बिट या 1 अक्षर (0 अथवा 1) से मिलकर बना होता है । ये द्विधारी संख्या पद्द्त में अक्षर को लिखने के लिये होता है । 1 बिट में आंकडे 0 या 1 के जोडे में होते हैं । (

(https://hi.wikipedia.org/wiki/%E0%A4%AC%E0%A4%BE%E0%A4%87%E0%A4%9F)

70 सम्पूर्ण पत्रकारिता, पृष्ठ सं. 259

71 पाञ्चजन्य, 25 फरवरी 2024, पृष्ठ सं.-50